दिनाङ्क: - 16.11.2024 सायम् - 06:20

<u>मुख्यवार्ताः</u>

- प्रधानमन्त्री नरेन्द्र मोदी प्रबलं प्रतिपादितवान् यत् तदीय प्रशासनं राजनीतिम् अपाकृत्य भारतं विकसित-राष्ट्र-विनिर्माण पथि अग्रेसरणाय कृतसंकल्पं विद्यते। झारखंड राज्ये द्वितीय चरणाय-महाराष्ट्रे एकचरणीय विधानसभानिर्वाचनाय च प्रचाराभियानं द्रुतगत्यां प्रचलति। छत्तीसगढ़-राज्ये नारायणपुरे अद्य सुरक्षाबलैस्साकं सञ्जाते संघर्षे पञ्च-माओवादिन: मारिता। अखिल-देशे अद्य राष्ट्रिय-प्रेस-दिवस: परिपाल्यते।
- दिल्ली-एनसीआर क्षेत्रेषु वायो: गुणवत्ता गंभीर-श्रेण्यां प्रविष्टा, आगामि-द्वि-दिवसेषु कुञ्झटिकाया: संभावना विद्यते।

<u>प्रधानमन्त्री</u>

प्रधानमन्त्री नरेन्द्र मोदी प्रबलं प्रतिपादितवान् यत् तदीय प्रशासनं राजनीतिम् अपाकृत्य भारतं विकसित-राष्ट्र-विनिर्माण पथि अग्रेसरणाय कृतसंकल्पं विद्यते। एकं सामाजिक दृश्य-सञ्चार संघटन द्वारा समायोजित आध्यक्ष-सम्मेलनम् सम्बोधयता असौ भणितवान् यत् तदीय एन डी ए प्रशासनं जनानाङ्कृते-जनेभ्य: एव कृते कार्यमाचरति।

तेन प्रतिपादितं यत् भाजपा प्रशासनं विकासस्य एतादृशं प्रारूपं प्रदर्शयति यत्र विनिवेशत: प्रगति-वृत्य-अवसराणि च प्राप्यन्ते। तेन उल्लिखितं यत् चतुर्दशोत्तर-द्विसहस्रतमे वर्षे देशे केन्द्रिय-आय-व्यय-आगारं आहत्य षोडश-लक्ष-कोटि-रूप्यकाणां अवर्तत, अद्य च इयं अष्टचत्वारिंशत् लक्ष-कोटयात्मकं विद्यते।

श्रीमोदिना प्रोक्तं यत् देशे साम्प्रतं सपाद-लक्षोत्तर-पञ्जीकृत-स्टार्टअप-विद्यन्ते, यून: देशं गौरवान्वितं कर्तुं समुत्सुका: दरीदृश्यन्ते।

<u>प्रधानमन्त्री-यात्रा</u>

प्रधानमन्त्री नरेन्द्र मोदी नाइजीरिया-ब्राजील गुयाना देशानां पञ्च-दिवसीय यात्रायै अद्य प्रस्थितो वर्तते। स्वीये प्रस्थान वक्तव्ये प्रधानमन्त्रिणा भणितं यत् पश्चिमी-अफ्रीकी-क्षेत्रे

नाइजीरिया देशे तस्य इयं प्रथमा यात्रा विद्यते। श्रीमोदिना प्रोक्तं यत् तस्य यात्रेयं सामरिक-सहयोगस्य नूतन-अवसरः प्रस्तोष्यति, या लोकतन्त्र-बहुलवादे च पारस्परिक-विश्वासे आधारिता भविष्यति। श्री मोदी नवदशतमीये जी-विंशति, उपवेशने ट्राइका-सदस्य रूपेण भागं निर्वक्ष्यति। तनोदीरितं यत् गतवर्षे भारतदेशस्य जी-विंशति सम्मेलनस्य सफल-अध्यक्षतायां जी-विंशति सम्मेलने सम्मिलितानां देशानां जी-विंशति-समूहः विनिर्मितः। वर्षेऽस्मिन् ब्राजील-देशेन जी-विंशति-समूहस्य अध्यक्षता सन्धारिता। तेन आशाभिव्यक्ता यत् एका पृथ्वी-एकः परिवारः, एकः भविष्यः एतादृशस्य दृष्टिकोणस्य अनुरूपम् अर्थपूर्णा चर्चा भविष्यति। श्री मोदिना सूचितं यत् गुयानायाः राष्ट्रपतिनः मोहम्मद-इरफानस्य निमन्त्रणे तस्य यात्रायाः पञ्चाशत् वर्षेषु कस्यापि भारतीय प्रधानमन्त्रिणः देशस्यास्य प्रथमा यात्रा भविता। उपवेशनकाले उभौ नेतारौ पारस्परिक-रिक्थ, संस्कृति-मूल्याधारित-अद्वितीय-सम्बन्धान् सामरिक-दिशा-प्रदानार्थं विचाराणां आदान-प्रदानं करिष्यतः।

पीएम-महाराष्ट्र

भारतीय-जनता-पार्टीति दलीय वरिष्ठो नेता, प्रधानमन्त्री च नरेन्द्र मोदी समाजस्य प्रत्येकस्मै वर्गाय सशक्ति-कर्तुं, तत्र ध्यानं प्रदातुं च महाराष्ट्रस्य महायुतेः प्रशासनस्य प्रयासाः प्रशंसिताः। मेरा बूथ-सबसे मजबूत इति कार्यक्रमान्तर्गतं महाराष्ट्रस्य भारतीय-जनता-पार्टीति-दलीय कार्यर्तृभिः साकं सामाजिक-अन्तर्जाल माध्यमेन सम्लपन् असौ प्रोक्तवान् यत् महाराष्ट्रस्य जनाः महायुतेः सर्वकारस्य सार्ध-द्वि वर्ष-पूर्त्यवसरे पूर्णतः सन्तुष्टाः सन्ति।

झारखण्डे एनडीए

झारखण्डे एनडीए तथा आई.एन.डी.आई.ए इत्येतयोः द्वयोः दलयोः राजनेतारः द्वितीयचरणस्य विधानसभानिर्वाचनार्थं स्वपक्षस्य प्रत्याशिनः समर्थने मतदानं प्राप्तुं राज्ये परिभ्रमन्ति। भाजपेति दलस्य वरिष्ठो नेता तथा केन्द्रीयगृहमन्त्री अमितशाहः आरोपितवान् यत् हेमन्तसोरेनसर्वकारः केवलं मतान् अवाप्ताये आदिवासी समुदायानां प्रयोगं करोति। दुमकायाः गांधी उद्याने एकां नैर्वाचानिकसभां सम्बोधयन् इदमुक्तम्। श्रीशाहः अवदत् यत् यूपीए-सर्वकारेण राज्यस्य आदिवासीनां कल्याणाय धनं न आवंटितम्।

जामताडायां निर्वाचनसभां सम्बोधयन् भाजपादलस्य वरिष्ठनेता तथा विधानसभासहप्रभारी हिमन्तविश्वसर्मा हेमन्त सोरेनस्योपरि मिथ्याप्रतिज्ञां कृतवान् इति आरोपितवान्। श्रीसरमा अवदत् यत् हेमन्तसोरेन्-सर्वकारं अपसारयितुं निर्वाचनं एव समीचीनः समयः अस्ति।

अपरपक्षे झामुमो दलस्य वरिष्ठनेता मुख्यमन्त्री च हेमन्तसोरेनः दुमकायां एकां नैर्वाचनिकजनसभां सम्बोधयन् आरोपितवान् यत् राज्ये निर्वाचनावधौ केन्द्रेण ईडी, सीबीआई दले च नियोजितम्।

काङ्ग्रेस-अध्यक्षः मल्लिकार्जुन खर्गे जामताड़ा-खिजरी-क्षेत्रयोः जनसभे कुर्वन् अस्ति। राजद-नेता तेजस्वी यादवः अपि गोड्डायां सभां सम्बोधितवान्। अवधेयं वर्तते यत् राज्ये द्वितीयान्तिम चरणाय मतदानं नवम्बरमासस्य विंशतिः दिनाङ्के भविष्यति। तत्रैव मतानां गणना मासस्यास्य त्रयोविंशे दिनाङ्के भविष्यति।

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।

<u>छत्तीसगढ़-माओवादी-संघर्षः</u>

छत्तीसगढ़-राज्ये नारायणपुरे अद्य सुरक्षाबलैस्साकं सञ्जाते संघर्षे पञ्च-माओवादिनः मृताः सूच्यन्ते। माओवादिनः सूचनां अधिगत्य सीमा-सुरक्षा-बल, विशिष्ट-कार्यबल-जनपद-आरक्षि-बलानां-संयुक्त-दलानि अन्वीक्षण-अभियाने सम्मिलिप्ताः आसन्। सुरक्षा-बलैः माओवादिनः मृतकशरीराणि अधिगतानि। घटनास्थलात् बृहन्मात्रिक-संख्यायां आयुध-सामग्री अधिगता। भुशुण्डी-प्रहारेषु सुरक्षा-कार्मिकाः आहताः सूच्यन्ते। अन्वीक्षणाभियानं तत्र प्रचल्यते।

<u>आईआईटीएफ</u>

केन्द्रीय-वस्त्र-मन्त्रिणा गिरिराज-सिंहेनाद्य नवदिल्ल्यां त्रि चत्वारिंशत्तमीये भारतीय-अन्ताराष्ट्रिय-व्यापार-मेलके आई आई टी एफ इत्यस्य मन्त्रालयस्य मण्डपं समुद्घाटितम्। श्री सिंहेन अवसरेऽस्मिन् प्रोक्तं यत् मेलकमिदं कार्यकर्तॄणां बृहत् मञ्चं प्रदास्यति, तेन भणितं यत् वर्षेऽस्मिन् भगवान् बिरसा मुंडायाः सार्धैक-पञ्चाशत्-तमीये जयन्त्यवसरे मण्डपेऽस्मिन् जनजातीय-जनानां विशिष्ट-हस्तोत्पादाः वर्तन्ते।

<u>एस ए डी-त्यागपत्रम्</u>

पञ्जाब-राज्ये पूर्व-उप-मुख्यमन्त्रिणा सुखबीर-सिंह-बादलेन अद्य शिरोमणि-अकाली-दलात् स्वीय अध्यक्षता परित्यक्ता। तेन स्वीय त्यागपत्रं कार्यकारी-समितिं प्रति प्रदत्तः। दलीय प्रवक्त्रा डॉ. दलजीत-सिंह-चीमा वर्येण सामाजिक-तन्त्रे इदं संसूचितम्।

प्रेस दिवस:

अद्य अशेष देशे राष्ट्रिय-प्रेसदिवस: आमान्यते। समाजे स्वतंत्र-उत्तरदायी-प्रेस-इत्यस्य महत्वपूर्ण भूमिका वर्तते। एतदर्थं तस्य सम्माने प्रत्येकस्मिन् वर्षे नवम्बर षोडशे दिवसे दिवसोऽयं परिपाल्यते। षट् षष्ट्रयुत्तर-नवदश-तमे वर्षे अस्मिन्नेव दिवसे भारतीय-प्रेस-परिषद् कार्यं कर्तुं प्रारब्धम्। अवसरेऽस्मिन् विभिन्नै: कार्यक्रमै: साकं पत्रकारितायाः क्षेत्रे उत्कृष्टता-पुरस्कार: प्रदीयन्ते, एका स्मारिका अपि प्रकाश्यते।

दिल्ली-प्रदूषण

राष्ट्रिय-राजधानी-क्षेत्रे दिल्ल्यां वायो: गुणवत्ता गंभीर-श्रेण्यां प्रविष्टा। अद्य अपराह्ने वायो: गुणवत्ता सूचकांक: सप्त्युत्तर-चतुश्शत-आकलित:। केन्द्रीय-प्रदूषण-नियन्त्रण-मण्डलानुसारेण शादीपुर-बवाना-आनन्दविहार-अलीपुर-अशोक विहार-रोहिणी इत्येतेषु स्थलेषु वायो: गुणवत्ता गंभीर-स्थित्यां वर्तते। ऋतुविभागेन प्रतिपादित यत् आगामि द्वि-दिवसेषु दिल्ली-एनसीआर क्षेत्रे रात्रौ प्रात: काले च कुञ्झटिकाया: सम्भावना वर्तते।

।।इति वार्ता:।।